# 2.3.1 QLM Supporting Documents



## वाग्वर्धिनीपरिषदः उद्घाटनसत्रम्

श्रीसोमनाथसंस्कृतविश्वविद्यालये ऐषमः छात्राणां वाक्कौशलवर्धनाय वाग्वर्धिनीपरिषदः उद्घाटनसत्रं २७.०१.२०२१ तमे दिनाङ्के प्रावर्तत। अस्य उद्घाटनसत्रस्य अध्यक्षः आसीत् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहाभागः। प्रभासज्योतिः इति शैक्षणिकभवनस्य सभागारे समायोजिते अस्मिन् उद्घाटनकार्यक्रमे कुलसचिवः डॉ. दशरथजादवः, अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार पटेलः, प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या, वाग्वर्धिनीपरिषदः अध्यक्षः प्रो. विनोदकुमारः झा, सर्वेऽपि प्राध्यापकाः छात्राश्च उपस्थिताः आसन्। अस्य उद्घाटनसत्रस्य प्रसारणं वेबेक्समाध्यमेन अपि अभूत् यत्र छात्राः संलग्नाः आसन्।

कार्यक्रमस्य आरम्भः दीपप्राकट्येन अभूत् यत्र वेदवेदाङ्गसङ्कायाध्यक्षः डॉ. शत्रुघ्नपाणिग्राही वैदिकं मङ्गलाचरणम् अकरोत्। तदनु अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार पटेलः मञ्चस्थमहानुभावानां परिचयपुरस्सरं शाब्दिकं स्वागतम् अकरोत्। अस्याः वाग्वर्धिन्याः परिषदः प्रास्ताविकं नैकोदाहरणपूर्वकं प्रो. विनोदकुमारः झा प्रास्तौत्। अस्मिन् अवसरे विश्वविद्यालयेन छात्रान् उद्दिश्य क्रियमाणकार्यविषये कुलसचिवः डॉ. दशरथ जादवः स्वकीये उद्बोधने अवादीत्। उद्घाटनसत्रस्य अध्यक्षेण मान्यकुलपतिना प्रो. गोपबन्धुमिश्रवर्येण स्वीयाध्यक्ष्ये उद्बोधने अवादि यत् वाचः संवर्धनाय परिषदः आवश्यकता अस्ति। छात्रेषु वाग्वर्धनाय इयं परिषत् भूयिष्ठा वर्तते। अस्याः परिषदः लक्ष्यं संस्कृतम् अस्ति, साधनमपि संस्कृतम् अस्तीति। कार्यक्रमान्ते प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या स्ववाग्विलासवचोभिः मधुरया रीत्या धन्यताविष्कृतिं प्राकटयत्। अस्य उद्घाटनकार्यक्रमस्य संयोजनं सत्रसञ्चालनं च वाग्वर्धिनीपरिषदः सभ्यसचिवः दर्शनप्राध्यापकः डॉ. जानकीशरण आचार्यः अकरोत्।



वाग्वर्धिनीपरिषदः उद्घाटनसत्रे दीपप्रज्वालनम्



वाग्वर्धिनीपरिषदः उद्घाटनसत्रे उपस्थिताः अध्यापकाः छात्राः च



उद्घाटनसत्रे आध्यक्ष्यं भाषमाणः माननीयः कुलपतिवर्यः

अंक- 27, जनवरी-मार्च- 2021, पृष्ठ संख्या-14

## मासव्यापी संस्कृतसम्भाषणवर्गः

श्रीसोमनाथसंस्कृतविश्वविद्यालये अस्मिन् वर्षे प्रविष्टानां छात्राणां संस्कृतसम्भाषणज्ञानाय १७/०७/२०२० तः आरभ्य एकमासं यावत् निरन्तरं संस्कृतसम्भाषणवर्गः आयोजितः। एषः वर्गः सम्पूर्णतया ओनलाइन आसीत् अतः छात्राः गृहे स्थित्वा एव समक्षमिव सम्भाषणं पठितवन्तः। एतत् सम्भाषणपठनम् अतीव रुचिकरं स्यात् तदर्थम् अध्यापकद्वयस्य उत्तरदायित्वे वर्गसञ्चालनम् आयोजि। डॉ.दीपेशः कतिरा तथा श्रीजिगरः भट्टः अतीव सरलपद्धतया चित्रमाध्यमेन पी.पी.टी. माध्यमेन छात्राणां सम्भाषणपाठनम् अकुरुताम्। प्रतिदिनं सायंकाले ०४ तः ०५ वादनं यावत् अस्य वर्गस्य वेबेक्स द्वारा आयोजनम् अभवत्। अस्मिन् वर्गे आहत्य ४० छात्राः सम्भाषणद्वारा संस्कृतं पठितवन्तः।

अस्य वर्गस्य समापनम् २०/०८/२०२० तमे दिनाङ्के सायंकाले ०४ वादने आयोजितम् आसीत्। समापने वर्गे पठितवन्तः छात्राः सरलसंस्कृतेन स्वानुभवकथनम्, कथाकथनम्, परिचयप्रदानम्, दिनचरीकथनम्, इत्यादि प्रस्तुतवन्तः। अस्मिन् अवसरे विश्वविद्यालयस्य माननीयः कुलपतिमहोदयः प्रो.गोपबन्धुमिश्रवर्यः छात्रेभ्यः शुभकामनाप्रदानपूर्वकम् आशीः प्रदत्तवान्। तेन वर्गसञ्चालकयोः कृतेऽपि धन्यवादभावः प्रकटीकृतः। समापनानन्तरम् अपि अस्य वर्गस्य प्रतिदिनम् आयोजनं भवेत् इति कुलपतिमहोदयस्य इच्छा आसीत् तथा वर्गस्य अध्यापकयोः अपि तदर्थम् सज्जता आसीत् अतः २०/०८/२०२० तमे दिनाङ्के समापनं कृत्वा पुनः प्रतिदिनम् अस्य वर्गस्य संचालनम् आयोजनं च डॉ.दीपेशमहोदयेन आरब्धम्। वर्गे मासं यावत् पठिताः छात्राः इतोऽपि स्तरवर्धनाय प्रतिदिनं सायंकाले सम्भाषणवर्गे पठन्ति। एवं विश्वविद्यालये नूतनप्रविष्टाः छात्राः सम्भाषणज्ञानपूर्वकं शास्त्रम् प्रति गच्छेयुः तदर्थम् अयं प्रकल्पः सुन्दररीत्या आयोज्यमानः अस्ति।








## भाषाशिक्षणवर्गस्य उद्घाटनम्

०१.०२.२०२१ तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये अनुस्नातकविभागे आचार्य-प्रथमवर्षस्य छात्राणां कृते भाषाशिक्षणस्य आरम्भः कृतः। एतस्य भाषाशिक्षणस्य कक्षाप्रातः १० वादनतः १०.४५ वादनं यावत् प्रचलति। अस्य भाषाशिक्षणवर्गस्य उद्घाटनं शैक्षणिकभवनस्य सेवकभ्रातृभिः दीपप्रज्वालनेन कृतम्। प्रत्येकं सोमवासरे मङ्गलवासरे बुधवासरे च डॉ. ललितकुमारः पटेलः तथा गुरुवासरे शुक्रवासरे शनिवासरे च श्रीजिगरभाई भट्टः छात्रेभ्यः भाषायाः प्राथमिकं शिक्षणं प्रयच्छति।



भाषाशिक्षणवर्गस्य उद्घाटने दीपप्रज्वालनं कुर्वाणाः अध्यक्षवर्याः डॉ. ललितकुमार पटेलवर्याः, सेवकभ्रातरः छात्राः च

## नेट स्लेट प्रशिक्षणवर्गस्य उद्घाटनम्




श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १५/१०/२०२० तमे दिनाङ्के सायं ५ वादने webex माध्यमेन यू॰जी॰सी॰ नेट स्लेट् पाठ्यक्रमस्य उद्घाटनसत्रस्य आयोजनमकारि। कार्यक्रमे अध्यक्षपदे विराजमानाः आसन् – श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रमहोदयाः। कार्यक्रमस्य सञ्चालनं व्याकरणविभागस्य सहायकाचार्यया सुश्रीविदुषीबोल्लावर्ययाऽनुष्ठितम्। कार्यक्रमस्यारम्भः वैदिकमङ्गलाचरणेन वेदविभागस्य सहाचार्यैः डॉ. शत्रुघ्नपाणिग्राहिमहोदयैः कृतः। ततः अनुस्नातकविभागाध्यक्षैः डॉ. ललितकुमारपटेलमहोदयैः महानुभावानां परिचयपूर्वकं शाब्दिकस्वागतं व्यधायि। स्वागतवाचनानन्तरं कार्यक्रमस्य वृत्तकथनं डॉ. उमामहेश्वरीवर्यया व्याहारि। वृत्तकथनात्परं कार्यक्रमस्य आमन्त्रकानां सारस्वतातिथीनां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवानां डॉ. दशरथजादवमहोदयानामुद्बोधनेन उपकृताः वयम्। एतेषामुद्बोधनानन्तरं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पूज्यकुलपतीनां प्रो॰ गोपबन्धु-मिश्रवर्याणां आध्यक्षीयवचोभिः मार्गदर्शनं प्राप्तवन्तः। कार्यक्रमस्यान्ते वेदविभागस्य सहाचार्यैः डॉ. शत्रुघ्नपाणिग्राहिमहोदयैः कार्यक्रमे उपस्थितानां महानुभावानां धन्यवादज्ञापनं कृतम्। कार्यक्रमेऽस्मिन् विश्वविद्यालयस्य सर्वे अध्यापकाः, विभागाध्यक्षाः, छात्राश्च आहत्य ७१ महानुभावाः ऑनलाइन वेबैक्स माध्यमेन उपस्थिताः आसन्।


विश्वविद्यालयस्य छात्रप्रतिभा
२०२० तमे वर्षे युजीसी नेट परीक्षायाम् उत्तीर्णाः छात्राः
श्री ऋषभ देरासरी
कु. धरमबेन कछोट
श्री रवि रादडीया
श्री केशव कुमार पाण्डेय
श्री कृष्ण कुमार पाण्डेय